❀ श्रीः ❀

समीक्षाचक्रवर्ति-विद्यावाचस्पति-स्वर्गीय-विद्वद्वर

पं० श्रीमधुसूदन ओझा विरचितः

(यज्ञविज्ञानांशभागे प्रयोगपारिजाते)

* निरूढ पशुबन्धः *

सोऽयम्

तदात्मजेन पं० श्री पद्युम्नशर्म्मणा सम्पादितः प्रकाशितश्च ।



द्वितीयावृत्तिः] वि० सं० २०१० [मूल्यम्।।)

सर्वेधिकाराः प्रकाशकाधीनाः

॥ श्रीः ॥

निरूढपशुबन्धः

सावित्रचयनगुणकनिरूढपशुबन्धप्रयोग उच्यते ।

सावित्रं स्वर्गकामश्चिन्वीत पशुबन्धे चीयते चेष्यमाण उपकल्पयते पंचाशीतिशतं हिरण्मेष्टका यावदुत्तममंगुलिपरु तावतीः शर्करा वाभ्यक्ताः चतस्रःस्वयमातृण्णाः अपरिमिता लोकम्पृणाः ।

प्रावृषि पर्वणि प्रातरग्निहोत्रं हुत्वा प्राणानायम्य देशकालौ संकीर्त्य ऐन्द्राग्ननिरूढपशुबन्धेन यक्ष्ये । समारोप्य देवयजनं गत्वा मथित्वा उपावरोह्यायतने निधाय सावित्रमग्निं चेष्ये इति संकल्प्य "विष्णु" अध्वर्य्युवरणादि पाशकं कर्म्म प्रतिपद्यते वेदं कृत्वा । वेदिकरणे विशेषः । दशाभिः पश्चाद्दशाभिः प्राच्याऽष्टाभिः पश्चात्प्राक्चरात परिग्रहान् कृत्वोत्तरवेदिदेशस्य मध्ये शंकुं निहत्य सर्वतः परिमण्डलं रथचक्रमात्रं सावित्रमर्द्धव्यायामेन सह परिमण्डलं परिलिख्य समलं हरितं दर्भस्तम्बमाहृत्य मध्येऽग्नेर्निखाय जह्नां पञ्चगृहीतं गृहीत्वा "सजरध्वो यावभिर्धृतेन स्वाहा अब्दायेदम्" । "सजूरुषा अरुणीभिर्धृतेन स्वाहा उषसेदम्" "सजूः सूर्य्य एतशेन घृतेन स्वाहा सूर्य्यायेदम्" । "सजोषसावश्विनावंसोभिर्धृतेन स्वाहा अश्विभ्यामिदम्" । "सजरग्नि वैश्वानर इड्या घृतेन स्वाहा अग्नये वैश्वानरायेदम्" । दर्भस्तम्बे पंचाहुतीर्जुहोति । तत उद्धृत्यावोक्ष्यापरेण यूपावटदेशं संवरमवशिष्येत्यादि व्याहारणान्तामुत्तरवेदिं कृत्वा लेखाया अभ्यन्तरं नवपरिमण्डला लेखा लिखित्वा सिकताभिरवकीर्य दर्भैः प्रच्छाद्य दध्ना मधुमिश्रेण शर्कराभिर्वाक्ष्य रेखां संपूर्य्य वसति । श्वोभूते प्रातरग्निहोत्रं । प्रजापतिस्त्वा सादयतु तया देवतयाङ्गिरस्वद्ध्रुवासीद" । उत्तरवेदिमभिमृशति । ततो यजमानः ।

"मयि गृह्णाम्यग्रे, अग्निं रायस्पोषाय सुप्रजास्त्वाय सुवीर्य्याय ।
मयि प्रजां मयि वर्चो दधाम्यरिष्टाम तनुवा सुवीराः ॥ १ ॥"

"यो नो अग्निः पितरो हृतस्वन्तरमृतो मर्त्या आविवेश ।
तमात्मनि परिगृह्णामहे वयंमासो आत्माँ आवह्यायपरागात् ॥२॥"

एताभ्यामात्मन्यग्निं परिगृह्णाति ॥ अध्वर्युः—

"यास्ते अग्ने समिधो यानि धाम या जिह्वा जातवेदे यो अर्चिः ।
ये ते अग्ने मेऽपो य इदं वस्तेभिरात्मानं चिनुहि प्रजानन् ॥१॥"

स्वयंचित्याभिमृशति । "अग्नेर्भस्मास्यग्नेः पुरीषमसि" । सिकतानि वपति । "संज्ञानमसि कामधरणम्, मयि ते कामधरणं भूयात्" । उषान् । "यदह्श्चन्द्रमासि कृष्णं तदिहास्तु" । मनसा ध्यायति—

संयावः प्रियास्तनुवः सांप्रिया हृदयानिव ।
आत्मा वो अस्तु संप्रियः संप्रियास्तनुवो मम ॥१॥

उषान् सिकताँश्च संमृज्य । "चितस्थः परिचित ऊर्ध्वचितः श्रयध्वं तया देवतयाङ्गिरस्वद् ध्रुवासीदत" ॥ अपरिमिताभिः शर्कराभिश्चितेरायतनं परिश्रयति । प्रतिशर्करं मंत्रावृत्तिः । "आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यं । भवा वाजस्य संगथे" । उप्ताः सिकता व्यूहति । नव लेखाःसंलोभयति ।

"मात्वा समुद्र उपदधे सुप्रजावनिं रायस्पोषवनिं मह्यं वाजिनाय,, । अभ्यन्तरं जघनार्धे उदपात्रमुपदधाति । पुरस्तादारभ्य प्रदक्षिणमुपदधाति । पुरस्तात् समाप्तिः ॥ वाङ्मे जपित्वा रोहति । "संज्ञानं तया देवतयांगिरस्वद् ध्रुवासीद" । विज्ञानं तयादे० । "प्रज्ञानं तया० । जानतयादे । अभिजानतयादेवतया० । संकल्पमानं तयादे० । प्रकल्पमानं तयादे० । उपकल्पमानं तया० । उपक्लृप्तं तया० । क्लृप्तं तयादे । श्रेयस्तया० । वसीयस्तया० । आयत्तया० । संभूतं तया० । भूतं तयादे० । पूर्वपक्षस्याहान्युपदधामीति मनस्यभिसंधायोपदधात् । एवमुत्तरापि अभिसंधायोपधानम् । तेषामुपहितानां अन्तरालेऽह्नां पञ्चदश मुहूर्तानुपदधाति ॥ चित्रस्तयादे । केतुस्तयादे । प्रभांस्तयादे । आभांस्तयादे । सभांस्तयादे । ज्योतिष्मांस्तयादे । तेजस्वाँस्तयादे । आतपंस्तयादे । तपंस्तयादे । अभितपंस्तयादे । रोचनस्तया० । रोचमानस्तयादे । शोभनस्तयादे । शोभमानस्तयादे । कल्याणस्तयादे । अथान्तरस्यामष्टम्यां रेखायां पूर्वपक्षस्य पञ्चदशरात्रीरुपदधाति ॥ दर्शा तयादे । दृष्टा तयादे । दर्शता तया । विश्वरूपा तयादे । सुदर्शना तयादे । आप्यायमाना तयादे । प्यायमाना तयादे । प्याया तया दे० । सूनृता तयादे । इरा तयादे । आपूर्यमाणा तयादे । पूर्यमाणा तयादे । पूरयन्ती तयादे । पूर्णा तया० पौर्णमासी तया० । तासां पूर्वपक्षस्यरात्रीणामन्तराले पंचदश मुहूर्तानुपदधाति ॥ दाता तया० । प्रदाता तया० आनन्दस्तया दे । मोदस्तया० । प्रमोदस्तया० । आवेशयंस्तयादे । निवेशयंस्तयादे । संवेशनस्तयादे संशान्तस्तया दे । शान्तस्तयादे । आभवंस्तयादे । प्रभवंस्तयादे । संभवंस्तयादे । संभूतस्तयादे भूतस्तयादे । अथान्तरस्यां सप्तम्यां रेखायां पंचदश अपरपक्षस्याहान्युपदधाति । प्रस्तुत तयादेव० । विष्टुत तयादे । स्तुतं तया० कल्याणं तयादे । विश्वरूपं तयादे । शुक्रं तयादे । अमृतं तयादे । तेजस्वि तयादे । तेजस्तयादे । समिद्धं तयादे । अरुणं तया० । भानुमंस्तयादे । मरीचिमत्तयादे । अभितपत्तयादे । तपस्वत् तयादे ॥

एतासामन्तराले पंचदश मुहुर्तानुपदधाति ॥ सविता तयादे। प्रसविता तयादे। दीप्तस्तयादे। दीप्यंस्तयादे दीप्यमानस्तयादे। ज्वलंस्तया०। ज्वलिता तया०। तपंस्तयादे। वितपंस्तया०। संतपंस्तया०। रोचनस्तया०। रोचमानस्तया०। शम्भूस्तया०। शम्भमानस्तया०। वामस्तयादे ॥

अथान्तरस्यां षष्ठयां रेखायां पंचदशापरपक्षस्य रात्रीरुपदधाति स्तता तया०। सुन्वतो तयादे। प्रस्तुता तयादे। सूयमाना तयादे। अभिपूयमाणातयादे। पीती तयादे। प्रपा तया०। संपा तया०। तृप्तिस्तया०। तर्पयन्ती तया०। कान्ता तया०। काम्या तया०। कामजाता तया०। आयुष्मती तया०। कामदुघा तया०। तासांरात्रीणामन्तराले पंचदश मुहूर्तानुपदधाति ॥ अभिशस्ता तायादे। अनुमन्ता तया०। आनन्दस्तया०। मोदस्तया०। प्रमोदस्तया०। आसादयंस्तया०। निषादयंस्तया०। संसादनस्तया०। संसन्नस्तया०। सन्नस्तया०। आभूस्तया०। विभूस्तया०। प्रभूस्तया०। शम्भूस्तया०। भुवस्तया०। अथान्तरस्यां पञ्चम्यां रेखायां द्वादश पूर्वपक्षानुपदधाति ॥ पवित्रं तयादे। पवयिष्यंस्तया०। पूतस्तया०। मेध्यस्तया०। यशस्तया०। यशस्वांस्तया०। आयुस्तया०। अमृतस्तया०। जीवस्तया०। जीवयिष्यंस्तया०। स्वर्गस्तया०। लोकस्तयादे ॥

अथान्तरस्यां चतुर्थ्यां रेखायामपरपक्षानुपदधाति ॥ सहस्वांस्तया०। सहीयांस्तया० ओजस्वांस्तया०। सहमानस्तया०। जयस्तया। अभिजयंस्तया०। सुद्रविणस्तया०। द्रविणोदास्तया०। आर्द्रपवित्रस्तया० हरिकेशस्तया०। मोदस्तया०। प्रमोदस्तया०।

अथान्तरस्यां तृतीयरेखायां त्रयोदशमासनामान्युपदधाति ॥ अरुणस्तया०। अरुणरजास्तया०। पुण्डरीकस्तया०। विश्वजित्तया०। अभिजित्तया०। आर्द्रस्तया०। पिन्वमानस्तया०। अन्नवांस्तया०। रसवांस्तया०। इरावाँस्तया०। सर्वौषधस्तया०। संभरस्तया०। महस्वातया०।

एतस्यां रेखायामन्तरालेषु सिकता उपदधाति ॥ एजत्कास्तया०। जीवन्कास्तया०। क्षुल्लकास्तया०। गिरिविष्टकास्तया०। सरिस्रास्तया०। सुशेवस्तया०। अजिरासस्तया०। गमिष्णुवस्तया०। अथान्तरस्यां रेखायां पंचदश मुहूर्तानुपदधाति ॥ इदानींतया०। तदानींतया०। एतर्हि तया देवतया०। क्षिप्रं तयादे। अजिरं तयादे। आशुस्तया० निमेषस्तया। क्षणस्तया०। द्रवंस्तया० अतिद्रवंस्तया०। त्वरंस्तया० त्वरमाणस्तया०। अशस्तया०। आशीयाँस्तयादे। जंवस्तयादे।

अथोत्तरस्यां रेखायां प्रथमं षड यज्ञक्रतूंस्त्रीणि चतुर्नामान्युपदधाति। अग्निष्टोमस्तया०। उक्थ्यस्तया०। अतिरात्रस्तया०। द्विरात्रस्तया० त्रिरात्रस्तया० ॥ चतूरात्रस्तया०। अग्निर्ऋतुस्तया०। सूर्य ऋतुस्तया०। चन्द्रमा ऋतुस्तया० ॥

[illegible]स्यां नाभ्यां चत्वारि संवत्सरनामान्युपदधाति ॥ प्रजापतिस्तया० । संवत्सरस्तया ॥ महांस्तया । कस्तयादे । चतस्रः स्वयमातृण्णा दिपदश्छन्दोधाति ॥

"प्रग्नि च पृथ्वीं च मां च त्रींश्च लोकान्संवत्सरं च । प्रजापतिस्त्वा सादयतु तया देवतया । "भुवो वायुं चान्तरिक्षं च मां च त्रींश्च लोकान् संवत्सरं च । प्रजापतिस्त्वासादयतु तयादे" स्वरादित्यंच दिवंच मांच त्रींश्च लोकान् संवत्सरं च । प्रजापतिस्त्वासाद० । 'भूर्भुवः सुवश्चन्द्रमसं च दिशश्च मां च त्रींश्च लोकान् संवत्सरञ्च प्रजा० तयादेव० ॥ लोकम्पृण छिद्रं पृण । अथो सीद शिवा त्वं । इन्द्राग्नी त्वा बृहस्पतिः । अस्मिन्योनावसीषदन् तयादेव० ।

"ता अस्य सूददोहसः सोमं श्रीणंति पृश्नयः ॥ जन्मन्देवानां विशः त्रिष्वारोचने दिवः ॥ तयादेव ॥ इति द्वाभ्यां द्वे इष्टके उपदधाति । एवं प्रकारेण लोकम्पृणाभिः प्रच्छादयति चत्वालोत्करात्पुरीषमाहृत्य

पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीराविवेश ॥
वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषः पातु नक्तम् ॥

चितावनुव्यूहति वाङ्म आसन्निति जपित्वाऽवरोहति,

"त्वमेव त्वां वेत्थ योसि सोसि, त्वमेव त्वामवैषीः ॥ चितश्चासि–"संचितस्चास्यग्ने, एतावांश्चासि-भूयांश्चास्यग्ने, यत्ते अग्ने न्यूनं यदु तेतिरिक्तं, आदित्यास्तदंगिरसश्चिन्वन्तु । विश्वे ते देवाश्चितिमारपूयन्तु । चितश्चासि संचितश्चास्यग्ने एतावांश्चासि भूयांश्चास्यग्ने ॥

"माते अग्ने च येन माति च येनायुरावृक्षि । सर्वेषां ज्योतिषां ज्योतिर्यददावुदेति, "तपसो जातमग्नि भृष्टमोजः तत्ते ज्योतिरिष्टके । तेन मे तप । तेन मे ज्वल । तेन मे दीदिहि । यावद्वेवाः यावदसातिसूर्य्यः । यावदुत्तापिब्रह्म । संचितमग्निमुपतिष्ठते । " पुरस्तात् प्रत्यङ् तिष्ठन् हिरण्यशकलशतद्वयेनाग्निं प्रोक्षति । सस्रस्य प्रभाऽसि" दक्षिणत उदङ्मुखस्तिष्ठन् पूर्ववत् प्रोक्षति । "सहसस्य प्रतिमाऽसि" पश्चात् प्राङ्-मुखस्तिष्ठन् पूर्ववत् प्रोक्षति "सहस्रस्य विमा असि" । उत्तरतो दक्षिण मुखस्तिष्ठन् पूर्ववत् प्रोक्षति । "सहस्योन्माऽसि" । सहस्रोसि सहस्रायत्वं मध्येप्राङ्मुखः—"यत्ते चितमिति चिति-क्लृप्त्याभिमृश्य । यत्तेऽचितं यदु चितं, ते अग्ने । यत्त ऊनं यदुतेतिरिक्तम । आदित्यश्चासि संचितश्चास्यग्ने । एतावांश्चासि भूयांश्चास्यग्ने ॥

"अग्ने देवाँ इहावह । जज्ञानो वृक्तवर्हिषि । असि होता न ईडयः । "अगन्म महा मनसासयविष्ठम् यो दीदाय समिद्ध स्वे दुरोणे । "वित्रभानू रोदसी अन्तरुर्वी । स्वाहुतं विश्वतः प्रत्यञ्चम् । "मेधाकारं विदथस्य प्रसाधनम् । अग्निं होतारं परिभूतमं मतिम् । त्वामर्भस्य हविषः समानमित । त्वामहो वृणते नान्यंत्वत् । मनस्वत त्वा निधीमहि । मनुष्वत समिधीमही । अग्ने मनुष्वदंगिरो देवान् देवयते यज । "अग्निर्हिवाजिनंन

विशे। ददाति विश्वचर्षणिः। अग्नीराये स्वाभुवम्। स प्रीतो याति वार्यम्। इषं स्तोतृभ्य आभर। इति पञ्चमीमृशति यजमानः। इमा मे अग्न इष्टका धेनवः सन्त्वेका च शतं सहस्रं चायुतं च प्रयुतं चार्बुदं च समुद्रश्च मध्यं चांतश्च परार्द्धश्चेमां मे अग्न इष्टका धेनवः सन्तु षष्टिसहस्रमयुतमक्षीयमाणा ऋतस्थास्थर्तावृधो घृतश्चुतो मधुश्चुत ऊर्ज्जस्वती स्वधाविनीस्ता मे अग्न इष्टका धेनवः सन्तु विराजो नाम कामदुघा अमुत्रामुष्मिल्लोके॥ इष्टकाधेनूमनसा यजमानः कुरुते।

"संवत्सरोऽसि। परिवत्सरोसि इदावत्सरोऽसीदुवत्सरोऽसि। इद्वत्सरोसि वत्सरोऽसि। तस्य ते वसन्तः शिरः। ग्रीष्मो दक्षिणः पक्षः। वर्षाःपुच्छम्। शरदुत्तरः पक्षः। हेमन्तो मध्यम्। पूर्वपक्षाश्चितयः। अपरपक्षाः पुरीषम्। अहोरात्राणीष्टकाः। ऋषभोऽसि स्वर्गोलोकः "यस्यां दिशि महीयसे। ततो नो मह आवह। वायुर्भूत्वा सर्वा दिश आवाहि। सर्वा दिशोऽनुविवाहि। चित्या चितिमाप्नुण। अचित्या चितिमाप्नुण। चिदसि समुद्रयोनिः।

"इंदुर्दक्षः श्येन ऋतावा हिरण्यपक्षः शकुनो भुरण्युः। महान् सधस्थे ध्रुव आनिषत्तः नमस्ते अस्तु मा मा हिंसीः" ॥ एति प्रेति वीति समित्युदिति। दिवं मे यच्छ अन्तरिक्षं मे यच्छ। पृथिवीं मे यच्छ। पृथिवीं मे यच्छ। अन्तरिक्षं मे यच्छ दिवं मे यच्छ। अह्ना प्रसारय। रात्र्या समच। रात्र्या प्रसारय-अह्ना समच। कामं प्रसारय-कामं समच। इत्यनुवाकेन संहारविहाराभ्यां यजमानोग्निमुपतिष्ठते। अध्वर्यु-रुदङ्-मुखस्तिष्ठन्नुत्तरतउत्तमायामिष्टकायामर्कपर्णे लाक्षाजीरं जुहोति। त्वमग्ने रुद्रो असुरो महो दिवः। त्वं शर्द्धो मारुतं पृक्त ईशिषे। त्वं वातैररुणैर्यासि शंगयः। त्वंपूषा विधतः पासि नु त्मना॥ देवा देवेषु श्रयध्वम्, प्रथमा द्वितीयेषु श्रयध्वम्, द्वितीयास्तृतीयेषु श्रयध्वम्, तृतीयाश्चतुर्थेषु श्रयध्वम्, पञ्चमाः षष्ठेषु श्रयध्वम्, षष्ठाः सप्तमेषु श्रयध्वम्, सप्तमा अष्टमेषु श्रयध्वम्, अष्टमा नवमेषु श्रयध्वम्, नवमा दशमेषु श्रयध्वम्, दशमा एकादशेषु श्रयध्वम्, एकादशा द्वादशेषु श्रयध्वम्, द्वादशास्त्रयोदशेषु श्रयध्वम्, त्रयोदशाश्चतुर्दशेषु श्रयध्वम्, चतुर्दशाः पञ्चदशेषु श्रयध्वम्, पञ्चदशाः षोड़शेषु श्रयध्वम्, षोड़शाः सप्तदशेषु श्रयध्वम्, सप्तदशा अष्टादशेषु श्रयध्वम्, अष्टादशाः एकान्नविंशेषु श्रयध्वम्, एकान्नविंशा विंशेषु श्रयध्वम्, विंशा एकविंशेषु श्रयध्वम्, एकविंशा द्वाविंशेषु श्रयध्वम्, द्वाविंशास्त्रयोविंशेषु श्रयध्वम्, त्रयोविंशाश्चतुर्विंशेषु श्रयध्वम्, चतुर्विंशाः पञ्चविंशेषु श्रयध्वम्, पञ्चविंशाः षड्विंशेषु श्रयध्वम्, षड्विंशाः सप्तविंशेषु श्रयध्वम्, सप्तविंशा अष्टाविंशेषु श्रयध्वम्, अष्टाविंशा एकोनत्रिंशेषु श्रयध्वम्, एकोनत्रिंशास्त्रिंशेषु श्रयध्वम्, त्रिंशा एकत्रिंशेषु श्रयध्वम्, एकत्रिंशा द्वात्रिंशेषु श्रयध्वम्, द्वात्रिंशास्त्रयस्त्रिंशेषु श्रयध्वम्, देवास्त्रिरेकादशास्त्रिस्त्रयस्त्रिंशाः उत्तरे भवतः, उत्तरवर्त्मानः उत्तरसत्वानः॥

"यत्काम इदं जुहोमि तन्मे समृध्यताम्, वयं स्याम पतयो रयीणां भूर्भुवः स्वः स्वाहा॥" इति।

त्रयस्त्रिंशादिभ्यो देवेभ्य इदम्, असंचरे पशूनामर्कपर्णमुदस्यति। अपरेणाग्निं प्राङ्मुख उपविश्य

सन्निधोक्थ्येन होत्रा शंसति । भूर्भुवः स्वरोजो बलम् ब्रह्म क्षत्रम् यशो महत् । सत्यं तपो नाम, रूपममृतम्, चक्षुः श्रोत्रं, मनः आयुः । विश्वं यशो महः समं, तपो हरो भाः ॥ ३ ॥

"जातवेदा यदि वा पावकोसि वैश्वानरो यदि वा वैद्युतोऽसि ।
त्वं प्रजाभ्यो यजमानाय लोकमूर्ज्जं पुष्टिं ददभ्यावभृत्स्व ३ ॥ १ ॥

न नः पातु द्रवैः परिधिभिरित्यादि अतिमुक्तहोमान्तं पशुवत् ॥ अथ चतुर्गृहीतं गृहीत्वा "त्वमग्ने रुद्रो असुरोमहोदिवः····· भूर्भुवः स्वः स्वाहा ॥ इत्यनुवाकेन जुहोति, हुत्वा पात्र्यां संपातमवनर्यति । त्रयस्त्रिंशादित्यो देवेभ्य इदम् । पुनश्चतुर्गृहीत गृहीत्वाग्नाविष्णू सजोषसा—इत्यनुवाकेन जुहोति ॥

"अग्नाविष्णू सजोषसा इमा वर्द्धन्तु वां गिरः । द्युम्नैर्वाजेभिरागतम्" राज्ञी विराज्ञी । सम्राज्ञी स्वराज्ञी । अर्चिः शोचिः, तपो हरो भाः । अग्निः सोमो बृहस्पतिः । विश्वेदेवा भुवनस्य गोपाः । ते सर्वे संगत्य-इदं मे प्रावता वचः । वयं स्याम पतयो रयीणाम् । भूर्भुवः स्वः स्वाहा" ॥

अग्नाविष्णुभ्यामग्नये सोमाय बृहस्पतय इदम् । अग्नाविष्णू राज्ञी विराज्ञी सम्राज्ञी स्वराज्ञी अर्चिः शोचिस्तपो हरो भाः । अग्निसोमबृहस्पतिविश्वेदेवप्रजापतिभ्य इदं न, अपरं चतुर्गृहीतं गृहीत्वा "अन्नपते इत्यनुवाकेन जुहोति" । "अन्नपतेऽस्य नो धेहि "अनमीवस्य शुष्मिणः । प्र प्रदातारं तारिषः । ऊर्जं नो धेहि । द्विपदे चतुष्पदे" । अग्ने पृथिवीपते । सोम वीरूधांपते । त्वष्टः समिधांपते । विष्णवाशां पते । मित्र सत्यानां पते । वरुण धर्माणां पते । मरुतो गणानां पतयः । रुद्र पशूनां पते । इन्द्र ओजसां पते । बृहस्पते ब्रह्मणस्पते । "आरुचा रोचेऽहं सायम् । रुचा रुरुचे रोचमानः ॥

अतीत्यादः स्वराभरेह तस्मिन्योनौ प्रजनौ प्रजायेय ॥ वयं स्याम पतयो रयीणाम् भूर्भुवः स्वः स्वाहा । अन्नपत्यग्नि सोम त्वष्ट्र विष्णु मित्र वरुण मरुद्र द्रेन्द्र बृहस्पतिभ्य इदम् । अन्नपत्यग्नि पृथिवी पति सोम वीरुधां पति त्वष्ट्र समिधां पति विष्णवाशानां पति मित्र सत्यानां पति वरुण धर्म्मणां पति मरुद् गणानांपति रुद्र पशूनां पति इन्द्र ओजसां पति बृहस्पति ब्रह्मणस्पति प्रजापतिभ्य इदम् ॥ अपरं चतुर्गृहीतं गृहीत्वा "सप्त ते अग्न" इत्यनुवाकेन जुहोति,

सप्तते अग्ने समिधः सप्त जिह्वाः सप्तर्षयः सप्त धाम प्रियाणि ।
सप्त होत्राः सप्तधा त्वा यजन्तु सप्तयोनीरापृणस्वा घृतेन ॥

प्राचीदिक् । अग्निर्देवता । अग्निं स दिशां देवं देवतानामृच्छतु । यो मैतस्यै दिशोभिदासति ॥ दक्षिणा दिक् । इन्द्रोदेवता, इन्द्रं स दिशां देवं देवतानामृच्छतु यो मैतस्यै दिशोभिदासति । प्रतीची दिक् सोमो देवता । सोमं स दिशां देवं देवतानामृच्छतु यो मैतस्यै दिशोभिदासति ॥ उदीची दिक् मित्रावरुणौ देवता, मित्रावरुणौ स दिशां देवौ देवतानामृच्छतु यो मैतस्यै दिशोभिदासति ॥ ऊर्ध्वादिक् बृहस्पतिर्देवता

बृहस्पतिं स दिशां देवं देवतानामृच्छतु यो मैतस्यै दिशोभिदासति। इयं दिक् अदितिर्देवता, अदितिं स दिशां देवीं देवतानामृच्छतु ॥ यो मेतस्यै दिशोभिदासति। पुरुषोदिक् पुरुषो मे कामान्त्समर्द्धयतु। अंधो जागृविः प्राणः। असावेहि। बधिर आक्रन्दयितरपान। असावेहि। उपसमुषसमशीय। अहमसो ज्योतिरशीय, अहमसोऽपोऽशीय, वयं स्याम पतयो रयीणाम् भूर्भुवः स्वः स्वाहा॥

अग्नीन्द्रसोममित्रावरुणबृहस्पत्यदितिपुरुषप्राणपतिभ्य इदम्॥ अग्निसप्तवत्यगीन्द्रसोममित्रावरुण-बृहस्पत्यदितिप्रजापतिभ्य इदम्॥

पुनश्चतुर्गृहीतं गृहीत्वा वसूनां त्वाधीतेन रुद्राणामूर्म्या, आदित्यानां तेजसा। विश्वेषां देवानां ऋतुना मरुता मेन्ना जुहोमि स्वाहा। वसुरुद्रादित्यविश्वेदेवमरुद्भ्य इदम्॥ राज्ञी विराज्ञी सम्राज्ञी स्वराज्ञी, अर्चिः शोचिः। तपो हरो भाः। अग्निरिन्द्रो बृहस्पतिः, विश्वेदेवा भुवनस्य गोपाः। ते मा सर्वे यशसा संसृजन्तु, संस्रावेण यजमानेन मुखं विमृष्टे।

अध्वर्युः—असवे स्वाहा, असव इदम्, वसवे स्वाहा, वसव इदम्, विभुवे स्वाहा, विभुव इदम्। विवस्वते स्वाहा-विवस्वत इदम्। अभिभुवे स्वाहा-अभिभुव इदम्। अधिपतये स्वाहा-अधिपतय इदं। दिवांपतये स्वाहा-दिवांपतय इदम्। अंहस्पत्याय स्वाहा-अंहस्पत्यायेदम्। चाक्षुष्मत्याय स्वाहा-चाक्षुष्मत्यायेदम्। ज्योतिष्मत्याय स्वाहा-ज्योतिष्मत्यायेदम्। राज्ञे स्वाहा-राज्ञ इदम्। विराज्ञे स्वाहा-विराज्ञ इदम्। सम्राज्ञे स्वाहा-सम्राज्ञ इदम्। स्वराज्ञे स्वाहा-स्वराज्ञ इदम्। पूषाय स्वाहा-पूषायेदम्। सूर्याय स्वाहा-सूर्यायेदम्। ज्योतिषे स्वाहा-ज्योतिष इदम्। संसर्पाय स्वाहा-संसर्पायेदम्। कल्याणाय स्वाहा-कल्याणायेदम्। अर्जुनाय स्वाहा-अर्जुनायेदम्। उत्तरेण गार्हपत्यामित्यादि वपाश्रपण्यधिहोमान्तं पशुवत्। दक्षिणाकाले पञ्चाशीत्यधिकशतं सक्तूनपष्ठौहीं हिरण्यं वासश्चान्तर्बेदि स्थापयित्वा ब्रह्मा—"ब्रह्मणि ब्रह्मणि स्थो ब्रह्मणे वोहुताद्यजाम। मा हिंसिष्ट हुता मह्यं शिवानि भवत" ॥ यजमानः—अध्वपिन्व स्वेत्यादि सहस्रधराण्युत्सावर्त्तायमाणानि तानि दध्रः पृथिवीमन्तरिक्षं दिवं च। तैरनड्वहसक्तून् पष्ठौहीहिरण्य वासोभिरतितराणि मृत्युम्। दक्षिणा—इमानि अनड्वहंसक्तून् पष्ठौहीं हिरण्यं वासांसि अहिंसन्तो यथाभागं प्रतिगृह्णीध्वम्। रुद्रापगाम्। ब्रह्मण औदनम् दक्षाय त्वा दक्षिणां प्रतिगृह्णाम्यग्नये हिरण्यम्। "प्रास्वाकृतन्नयसस्त्वा तन्वन् वरूत्रय सोमाय वासः॥ तेनामृतत्वं स्याम। इति प्रतिग्रहः॥

समुत्क्रम्य सहपत्नीकाः इत्यादि। यत् प्राङ्मनोतायास्तत्कृत्वा जुहूपभृतो हिरण्यशकलमवधाय मृत्युग्रहपत्ने औदुम्बरं ग्रहं पाशुकैः सह प्रयुज्य ग्रहं प्रक्षाल्य तस्मिन् वसां गृह्णाति। "विपश्चिते पजमानाय गायत मही न धाराऽत्यन्धो अर्षति॥ अहिर्हं जीर्णामतिसर्पति त्वचं अत्यो नः क्रीडन्नसरद्वृषाहरिः॥

उपयामगृहीतोसि—मृत्यवे त्वा जुष्टं गृह्णामि। पूष्णो मृत्युग्रहं गृहीत्वा "एष ते योनिर्मृत्यवे त्वा अपरेण स्रुचः सादयति। मनोतादस्विष्टकृत हुत्वा वैश्वानरे हविरायतने स्रुचौ सादयित्वा—मृत्युग्रहं हस्तेन गृह्णात्युत्तरेणोत्तरवेदिमुपविश्य—"विद्युदसि विधम पाप्मानममृतात्सत्यमुपैमीत्यपउपस्पृश्य।

"अपमृत्युमपक्रुधं अपेतः शपथं जहि। अधा नो अग्न आवह रायस्पोषं सहस्रिणम्॥
ये ते सहस्रमयुतं पाशाः मृत्यो मर्याय हंतवे। तान् यज्ञस्य मायया सर्वानवयजामहे स्वाहा॥

(मृत्यवइदम्।) वृष्टीरसीत्यप उपस्पृश्य इडामार्जनान्ते ग्रहं सावशेषं भक्षयति। भक्षमंत्रे विशेषः—"भक्षोस्यमृतभक्षस्तस्य ते मृत्युपीतस्यामृतवतः। स्वगाकृतस्य मधुमतः उपहूतस्योपहूतो भक्षयामि॥१॥ भक्षयित्वाचम्य—मन्द्राभिभूतिरिति" प्राणानि बाह्यात्मनि प्रतिष्ठापयेत् (मन्त्र) "मन्द्राऽभिभूतिः केतुर्यज्ञानां असावेहि॥२॥ अन्धो जागृविः प्राण। असावेहि। बधिर आक्रन्दयितरपान असावेहि। अहस्तोस्वा चक्षुः अपादाशो मनः। असावेहि। कवे विप्रचित्तो श्रोत्र। असावेहि॥ ३॥ "सुहस्तः सुवासाः शूषो नामास्यमृतो मर्त्येषु। तं त्वाऽहं तथा वेद। असावेहि। अग्निर्मे वाचि श्रितः॥" वाग्घृदये। हृदयं मयि। अहममृते। अमृत ब्रह्मणि। वायुर्मे प्राणे श्रितः। प्राणो हृदये, हृदयं मयि। अहममृते। अमृतं ब्रह्मणि सूर्यो मे चक्षुषि श्रितः। चक्षुर्हृदये। हृदयं मयि। अहममृते। अमृत ब्रह्मणि। चन्द्रमा मे मनसि श्रितः॥५॥ मनो हृदये हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। दिशो मे श्रोत्रे श्रिताः। श्रोत्रँ हृदयं। हृदय मयि। अहममृते। अमृत ब्रह्मणि। आपो मे रेतसि श्रिताः॥६॥ रेतो हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। पृथिवी मे शरीरे श्रिताः। शरीरँ हृदये। हृदयं मयि। अहममृते अमृत ब्रह्मणि। औषधिवनस्पतयो लोमसु श्रिताः॥७॥ लोमानि हृदये। हृदय मयि। अहममृते। अमृत ब्रह्मणि। इन्द्रो मे बले श्रितः। बलं हृदये। हृदय मयि। अहममृते अमृत ब्रह्मणि। पर्जन्यो मे मूर्धनि श्रितः॥८॥ मूर्धा हृदये। हृदय मयि। अहममृते। अमृत ब्रह्मणि। ईशानो मे मन्यौ श्रितः। मन्युर्हृदये। हृदय मयि। अहममृते। अमृतं ब्रह्मणि। आत्मा मे आत्मनि श्रितः। आत्मा हृदये हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। "पुनर्म आत्मा पुनरायुरागात्। पुनः प्राणः पुनराकूतमागात्॥ वैश्वानरो रश्मिभिर्वावृधानः। अन्तस्तिष्ठत्वमृतस्य गोपाः॥९॥ इत्यन्तमनुवाकं ब्रूयात्। अग्नी दौषय जान गाना हरेत्यादि ब्राह्मण तर्पणान्तम्॥ संतिष्ठते सावित्रः। अनन्तरं पर्वणि मैत्रावरुण्यामिक्षया यजेत। सावित्राग्नं मैत्रावरुण्या यजेत। "विद्युदसीत्यादि" अन्वाधाय शाखामादृत्य व्रतप्रवेशः। उत्तरेण गार्हपत्यमित्यदिनेध्मप्रवञ्चनम्। वेदं कृत्वा वेदिः। अन्तर्वेदिशखायाः—इत्यादित. तृतीयस्यै कुम्भलेपनान्तम्। संमूहनादि इमौ पर्णौ च। "वायवस्थ" परिस्तृणीत देवा देवेषु कमणे वामित्यादि॥ स्त्यमग्निहोत्र हवनीमपरतः। स्रुवं जुहमुपभृतं ध्रुवां वेदमाज्यास्थालीमिडापात्रं योक्त्रं वेदाद्यानि अन्वाहार्यस्थालीमुपवेशं प्रातर्दोह

पात्राणि वाजिनपात्रं च प्रयुज्य पवित्रे कृत्वा। यजमान वच यच्छ। संविशन्ताम्। "कस्त्वा युनक्ति सत्वा युनक्तु" प्रोक्षणी संस्कृत्य ब्राह्मणमामन्त्र्य पात्राणि प्रोक्ष्य शेषं निधाय यजमान एता आचरन्तीत्यादि कामधुक्षः प्राणो व्रूयात्—मित्रावरुणाभ्यां हविः। 'ऊदुग्धि मित्रावरुणाभ्यां"। संक्षालननिनयनान्तम्। तप्ते प्रातर्दोहो लौकिकं दध्यानयति। "अन्तरिक्षं रक्षः" अविदह। प्रथमपशौ संवत्सरमकृते विभ्रष्टेष्टिरेव। पशोः प्रयोगः। सूपवसादिकाले विषये संकल्पितकालातिपत्तौ दर्शवत्॥ मुख्यकाले पशावशक्तौ तस्मिन् काले वैश्वानरीमनुवक्ता। दर्शनारम्भे विभ्रिष्टेष्टिः। प्रथमप्रयोगे आग्नेयाद्यन्यन्तरकरणे लोके विभ्रिष्टेष्टिः। द्वितीयादिष्वन्यतरकरणालोपेन समाप्ते प्रयोगे अनन्तरमेव तस्य सांगस्य पुनरनुष्ठानं। वरुणप्रघासादीनामपि स्वकालाकरणे पथिकृद्विधिचतुष्टयं भवति। तथा नक्षत्रेष्टिः दिवः श्येनादीनां द्वितीयाद्यकरणे। आहिताग्नेः कृतप्रायश्चित्तपशुकस्य वसन्ते सोमयागारम्भ विभ्रष्टक्रतुः। सप्तदशोऽग्निष्टुत्। अभ्याससंकल्पे स्वकालाशक्तौ वैश्वानरी। तस्यां चाकृतायां विभ्रष्टक्रतुः सोमश्च। आगमिकात् प्रागग्निहोत्रानुष्ठाने सर्वदा सप्त होता। काम्येष्टिपशुप्रयोगे प्रक्रान्ते कालातिपत्तौ संयाज्ये पथिकृती सर्वत्र प्रायश्चित्तं च। न श्रपयत। ब्रह्मन्युत्तर परिग्राहमित्यादि प्राशित्रवर्जं संमार्ज्य। विष्णुनिस्थेत्यन्ते "यस्त आत्मेत्यभिधार्य्य इंहेत्युद्वास्य संहत्य द्वयोः पात्रयोरित्यादि॥ प्रियेणेत्यासादनम्। तूष्णीमुत्करे वाजिनम्। इदमिन्द्रियम्। यत् पृथिवी "अय यज्ञो ममाग्ने पञ्च होता। प्रचरणकाले। मित्रावरुणाभ्यामनुब्रूहि। मित्रावरुणौ यज। मित्रावरुणाभ्यामिदम्। "मित्रावरुणयोरहं देवयज्ययेन्द्रिया बिभूयासं जेमान मितिवा। दक्षिणाकाले वशा दक्षिणा। संस्रवान्ते वाजिनयागः। यज्ञो बभूव शंचभवर्जनम्। ब्राह्मणतर्पणान्तं सन्तिष्ठते इष्टिः॥

॥ इति निरूढपशुबन्धः ॥

